# Kashyapakritam Vamana Stotram

# कश्यपकृतं वामनस्तोत्रम्

## Document Information

Text title : Kashyapakritam Vamana Stotram

File name : kashyapakRRitaMvAmanastotram.itx

Category : vishhnu, vishnu, bRRihannAradIyapurANa, stotra, dashAvatAra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : bRRihannAradIyapurANa | pUrvabhAga | adhyAya 10-11/72-81||

Latest update : November 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 16, 2024

*sanskritdocuments.org*

# कश्यपकृतं वामनस्तोत्रम्

कश्यप उवाच ।
नमो नमस्तेऽखिलकारणाय नमो नमस्तेऽखिलपालकाय ।
नमो नमस्तेऽमरनायकाय नमो नमो दैत्यविनाशनाय ॥ ११-७२॥

नमो नमो भक्तजनप्रियाय नमो नमः सज्जनरञ्जिताय ।
नमो नमो दुर्जननाशनाय नमोऽस्तु तस्मै जगदीश्वराय ॥ ११-७३॥

नमो नमः कारणवामनाय नारायणायामितविक्रमाय ।
सशार्ङ्गचक्रासिगदाधाराय नमोऽस्तु तस्मै पुरुषोत्तमाय ॥ ११-७४॥

नमः पयोराशिनिवासनाय नमोऽस्तु सद्धृत्कमलस्थिताय ।
नमोऽस्तु सूर्याद्यमितप्रभाय नमो नमः पुण्यकथागताय ॥ ११-७५॥

नमो नमोऽर्केन्दुविलोचनाय नमोऽस्तु ते यज्ञफलप्रदाय ।
नमोऽस्तु यज्ञाङ्गविराजिताय नमोऽस्तु ते सज्जनवल्लभाय ॥ ११-७६॥

नमो जगत्कारणकारणाय नमोऽस्तु शब्दादिविवर्जिताय ।
नमोऽस्तु ते दिव्यसुखप्रदाय नमो नमो भक्तमनोगताय ॥ ११-७७॥

नमोऽस्तु ते ध्वान्तविनाशकाय नमोऽस्तु ते मन्दरधारकाय ।
नमोऽस्तु ते यज्ञवराहनाम्ने नमो हिरण्याक्षविदारकाय ॥ ११-७८॥

नमोऽस्तु ते वामनरूपभाजे नमोऽस्तु ते क्षत्त्रकुलान्तकाय ।
नमोऽस्तु ते रावणमर्दनाय नमोऽस्तु ते नन्दसुताग्रजाय ॥ ११-७९॥

नमस्ते कमलाकान्त नमस्ते सुखदायिने ।
स्मृतार्तिनाशिने तुभ्यं भूयो भूयो नमो नमः ॥ ११-८०॥

यज्ञेश यज्ञविन्यास यज्ञविघ्नविनाशन ।
यज्ञरूप यजद्रूप यज्ञाङ्ग त्वां यजाम्यहम् ॥ ११-८१॥

इति स्तुतः स देवेशो वामनो लोकपावनः ।

उवाच प्रहसन्हर्षं वर्धयन्कश्यपस्य सः ॥ ११-८२॥

इति नारदपुराणे पूर्वभागे एकादशाध्यायान्तर्गतं
कश्यपकृतं वामनस्तोत्रं समाप्तम् ।

बृहन्नारदीयपुराण । पूर्वभाग । अध्याय १०-११/७२-८१ ॥

bRRihannAradIyapurANa . pUrvabhAga . adhyAya 10-11/72-81..

Proofread by PSA Easwaran

---

*Kashyapakritam Vamana Stotram*
pdf was typeset on November 16, 2024

Please send corrections to *sanskrit@cheerful.com*